०१
०८

विश्वेदेवाः

४४४४

२०७७

सा. २००७ नं ३२

जयतु संस्कृतम्

नं. ४४४४
२१३

विश्वेदेवाः

BISHOW DEVA

Renuka Poudyal

लेखकः—

पूर्णप्रसादः, ब्राह्मणः

(नेपालीयः)

सा. २०००

जयतु संस्कृतम्

नं० ४४४४

विश्वेदेवाः

लेखकः--

पूर्णप्रसादः, ब्राह्मणः

(नेपालीयः)

वि० सं०	प्रथमवारम्	मूल्यम्
२०११	१०००	एकं रूप्यकम्

एतत्

समर्प्यते

सत्यं परिप्सीषुभ्यः

विश्वबन्धुत्वे जिगमिषुभ्यः

आत्मनि मानवताम् आनिनीषुभ्यः

मुद्रक—

लु० ऋद्धिबहादुर मल्ल

जोरगणेश प्रेस, नेपाल ।

सा० २७००

मम सहायकग्रन्थाः—

मुक्तिकोपनिषद्
श्रीमद्भगवद्गीता
विश्व इतिहासकी रूपरेखा (श्री प्यारेलाल)
महापुरुषोंके दर्शन (प्रो. रामस्वरूप कौशल)
इस्लाम धर्मकी रूपरेखा (श्री महापण्डित राहुल सांकृत्यायन)
आत्मकथा (म. गान्धि)

दर्शनक्रमः

महापुरुषाणाम्	पृष्ठानाम्
श्री रामः	१—६
श्री. कृष्णः	७—१२
म. बुद्धः	१३—१८
म. ईसामसीहः	१९—२४
म. मुहम्मदः	२५—३१
कुमारी फ्लोरेन्स नाइटिंगेलः	३२—३५
म. लेनिनः	३६—४२
म. गान्धिः	४३—५९

सा० २०००

किञ्चित् वक्तव्यम्

यत्र स्मृतिः अस्माकं राष्ट्रस्य प्रथमविकासस्य, प्रादुर्भूता यतोऽस्माकं उत्तमा विश्वभावना, विश्वजनीनं विशालम् उद्देश्यं च, प्राप्ता यतोऽस्माकं विचारे उच्चता, आदर्शे च पवित्रता ! यत एव जीवतितराम् अस्माकं राष्ट्रीयजीवनस्य एकता, यत एव वा वयं सार्वभौम-संबन्धाय ससाफल्याः !, यत्रान्तर्हिताऽस्माकं सांस्कृतिकी गूढशक्तिः, यद्गर्भे वर्वर्ति विश्वज्ञानकोषः, या उद्मीलयत विश्वेषाम् आध्यात्मिकीं दृशम्, याऽस्माकं विश्वेषामेव वा पूर्वजानां मातृभाषा, सर्वासां च भाषाणां मूलम्, या विश्वेषामेव पैतृकी संपत्तिः ! सा भगवती संस्कृतभाषा न केवलं संरक्षणीया, हृदयेनैव केवलं सँमाननीया, नवा केवलं पूज्ययैव दृशा दर्शनीया, अपितु विश्वभूतये त्यागतपसाऽपि उद्धरणीया, विकासनीया चेति धारणावताम् अहमस्मि एकः । तस्या एव धारणायाः प्रेरणाफलम् एतत्–'विश्वे देवाः', यत् पाठकानां पुरः संस्कृते उपहरन्नस्मि ।

एतदस्ति विज्ञानयुगम् । विश्वमेवाऽस्ति सांप्रतं गृहप्राङ्गणायितम् । अधुना भाषातिरिक्ताः अन्यान्या अपि सामाजिक्यः, सांस्कृतिक्यः, नैतिक्यो वा नवा नवाः विश्व-समस्याः भूयोभूयः सन्ति समाधेयाः, याः किंकर्तव्यमूढाः महामहत्तमानां युगपुरुषाणां पावनानि दर्शनानि, जगद्धिताः कृतीश्च आशिश्रीषन्ते ! यत एतेषाम् एकत्र प्रकाशनीयतां साधीयसीम् अहम् अमन्ये । यतः आशास्यते– सर्वेषामपि महापुरुषाणाम् दर्शनम् भिन्नगतिकमपि एकप्राप्तिकम् इति, वादसंघर्षः वस्तुतः विश्वहितान्तराय इति च पाठकाः सम्यक् बुध्येरन्, बोधयेरन् चेति,– यत विश्व-

मानवसमाजस्य सदस्यत्वेन, भावनीयं कर्तव्यंच भवति। एतदैव लक्ष्यं ममास्य प्रयासस्य। विषयस्तु सर्वसमक्षमेवाऽस्ति। उच्च-नीचम् यत् भवेत्, भवत्येव क्षमनीयम् !

किञ्च- वाचनप्रगमतायै (वस्तुतः संस्कृतप्रचाराय) पद्य-शब्दानामपि प्रायः सन्धिपृथक्करेण दर्शनम् मम व्यसनमि-वाऽस्ति, यथा महाकाव्ये सत्यहरिश्चन्द्रेऽपि। वस्तुतः मया सन्धिनियमपालनायकाशं संरक्ष्यैव पद्यशब्दाः छन्दोबद्धाः कृताः भवन्ति। ये कस्यापि वाङ्मयस्य सामयिकताम्, उपयोगिताम्, कलां, साहित्यं च सर्वाप्यपि उपेक्ष्य व्याकरणमेव कृतिसर्वस्वं, विद्वत्तानिकषं वा मन्येरन्, दयनीयधियस्ते सन्धिनियमयोगेनैव मत्पद्यानि पठेयुरिति आशासे। अन्यथा एतदपि अनन्तर-विचारणीयमस्ति--देशस्य राष्ट्रियसंगठनस्य संभाव्यसाधनै-कतया, यया संपत्त्या (समृद्धया संस्कृतभाषया) अस्माकं देशः इतरेतरेभ्यः सौभाग्यशाली अस्ति, तस्या उन्नतिविकासाय, प्रचाराय च तदन्तरायौ शैलीकाठिन्यं, नियमकाठिन्यं च अस्माभिः न सांप्रतमेव अङ्गीकरणीये, अन्यथा सान्धकारो भावी संस्कृते-तिहासः नूनमस्मभ्यम् अन्ततः शपस्यति ! इति मेऽस्ति लक्ष्यी धारणा। अथवा संस्कृतोद्धाराय ये यत्र तत्र महनीयं भाषन्ते चेष्टन्ते च, तेऽस्माकं पुण्यश्लोकाः भारतीयनेतारः श्री संपूर्णानन्द-(शिक्षामंत्री, संयुक्तप्रान्तस्य) प्रभृतयः उक्तलक्ष्याय कां वा सरणीम् अनुमन्यन्ते !, इतरे वा विद्वांसः !

किञ्च—लेखनाय, मुद्रणाय च प्रोत्साहयतः नेपालक्रान्तियुगप्रवर्त-कस्य माननीयस्य प्रधानमंत्रिणः श्री मातृकाप्रसाद 'कोइराला' स्य अहम् ऋणी अस्मि। जयतु संस्कृतम् !

—लेखकः

अमृतं त्वर्पितचरम् अस्मभ्यं तैः .महात्मभिः
तथापि न वयं हन्त! मृत्युं लङ्घयितुं क्षमाः!

श्रीरामः

युगं त्रेताऽस्ति, यज्ञस्य प्रचारोऽस्ति, प्रजाः समाः
वर्णाश्रमरताः सन्ति प्रायः, शान्ता विमत्सराः

१

आर्यावर्तस्य राज्यानां नेतृत्वं सूर्यवंशिनः
श्वपाः कुर्वन्ति, तेऽयोध्यां शासति न्यायभूमयः

२

तदाऽपि राक्षसो, देवो द्वौ वादौ द्रुह्यतो मिथः
शोषणात्मा पूर्व आसीत्, भरणात्मा च पश्चिमः

३

राक्षसो दक्षिणोद्भूतः प्रसर्पन् दैववादिनाम्
धर्मारण्येषु, राज्येषु भूयोभूयः प्रबाधते

४

अशान्तिरस्ति सर्वत्र गृहस्थाः, तापसा अपि
जनशान्त्यै महः किञ्चित् प्रार्थयन्ते नभोदृशः

५

सत्यध्येयस्य लोकस्य संयुक्ता प्रार्थनैव हि
बोध्यते निराकारा रूपरेखा भविष्यतः

६

विद्या काचित् महाशक्तिः मूर्तैव विश्वधारणा
अवातरत् कौशल्यागर्भतो धरणीतले

७

राज्ञो दशरथस्यान्तर्हृदयात् हर्ष उद्गतः
हर्म्यं, साकेत, भवनं च क्रमात् व्याप तत्क्षणात्

८

बालकेन्या स्वपितरौ, लौराज्यस्याशया महीम्
हर्षयन् ववृधे रामो लोकोद्धारधिया सह

९

रामो मारीचमुत्क्षिप्य, शुद्धीकृत्य च गौतमीम्
कौमारात् स्वस्य लक्ष्यस्य सूत्रपातं भुवि व्यधात्

१०

माहेशं धनुरुत्तोल्या,ऽवधीर्य विश्वभूपतीन्
रामः पर्यणयत् सीताम् मूर्तां शक्तिमिवोज्ज्वलाम्

११

मूढक्रोधम्, जीर्णधियमृजामदग्न्यं स वर्त्मनि
विघ्नन्तं क्षत्रियान् त्रातुं तेजस्वैव व्ययोजयत्

१२

दुष्टान् उन्मूल्य संसारं शान्तौ नेतुं दृढाशयः
रामो राज्यं तृणीकृत्य भ्रात्रा, पत्न्या वनं गतः

१३

निषादं गुहमालिङ्ग्य वने दाशरथिः परम्
समदर्शित्वमादर्शं प्रथमं लोकमादिशत्

चित्रकूटे समिवर्त्य भरतं स स्वमान्तरम्
निःस्वार्थित्वं, लोकसेवाभावं च समदर्शयत्

१५

निघ्नन् मूर्तान् तपोविघ्नान् इव तान् रक्षसां गणान्
दण्डके, शान्तिमतनोत् तापसानां स मानसे

१६

बन्धुघातात् पराभूतः स्वाभिमानी स रावणः
प्रतिक्रियाधिया सीताम् अहरत् विजने वनात्

१७

स वनेचरराजेन सुग्रीवेण मिलन्, बृहत्
बलसंवर्धनं कृत्वा पौलस्त्यमभ्यवेणयत्

१८

सकुलं रावणं हत्वा, कृत्वा भूमिमकण्टकाम्
ससीतालक्ष्मणोऽयोध्यां पुष्पकात् स निवृत्तवान्

१९

रामरावणयोः युद्धं सृष्टेः सा घटनाऽऽदिमा
मानवात् प्रथमो यत्र दानवस्य पराजयः

२०

ततोऽयोध्याराज्यपीठे स्थितो धर्म्यमनुत्तमम्
राज्यं चकार श्रीरामो मर्यादापुरुषोत्तमः

२१

न्यहन् तापसशंबूकं, अत्यजच्च सतीं प्रियाम्
समदर्शयपि, विभोऽपि स लोकमतगुप्तये

२२

न तस्य राज्ये कोऽप्यासीत् अल्पायुः, सामयो, ऽधनः
नवा धर्मपरिभ्रष्टो नवा न्यायप्रवंचितः

२३

युगान्यपि ययुः, किन्तु रामः, तस्य च शासनम्
द्वे एवाऽदर्शरूपेण मर्त्येऽद्यापि प्रजीवतः !

२४

चराचरस्य लोकस्य स्थितये, विश्वभूभुजाम्
आदर्शः स स्वमन्तव्यम् एवं लोकाय दत्तवान्--

२५

चराचरमयं सर्वं जगदेतत् परात्मनः
मायायाः प्रबलो मिथ्याविलासः प्रतिबुध्यताम्

२६

पुरातनः सुखमयः सर्वगः स्वयमातपः
आत्मा न जन्म, मरणं, वृद्धिं, ह्रासं च गच्छति

२७

अनाद्यविद्योत्पन्नायां हि बुद्धौ प्रतिबिम्बितः
चेतनस्य प्रकाशो यः स जीव इति कथ्यते

२८

आत्मन्यस्मिन् सुखमये संसरस्याऽसुखात्मनः
प्रतीतिरज्ञानवशात् अध्यासात् एव जायते

२९

मायामोहात् शरीरादौ स्वात्मभावो भवेत् नृणाम्
नेतीत्यनात्मके वस्तुजाते ज्ञाते स नश्यति

अज्ञानमेव जीवानां भवेत् संसारकारणम्
तन्नाशश्च भवेत् ज्ञानादेव, नत्वन्यकर्मभिः

३१

प्राप्तुकामैः अपि ज्ञानं आदौ तु स्वान्तशुद्धये
सर्वैः सम्यक् अनुष्ठेयाः यथावर्णाश्रमं क्रियाः

३२

यथागमं कृतेनाऽपि कामस्पृष्टेन कर्मणा
नृणां न रागः क्षयति, नचाऽज्ञानं प्रणश्यति

३३

ज्ञानं स्वतन्त्रमेवाऽस्ति, तत् जीवः स्वस्य मुक्तये
न कानिचन कर्माणि स कदाचित् अपेक्षते

३४

मोक्षोपाये ज्ञानपथे प्राप्तुकामैः समैः जनैः
लौकिको व्यवहारोऽपि कर्तव्यः सुनिरूपितः

३५

विजित्य शत्रुषड्वर्गं, नियम्येन्द्रियवाजिनः
अलक्तं कर्म कुर्वाणाः प्राप्नुवन्तीश्वरान्तिकम्

३६

मुमुक्षुणा मनुष्येण सर्वत्र समताहृदा
चराचरं जगत् सर्वं द्रष्टव्यम् ईश्वरात्मकम्

३७

दुष्टान् निर्मूल्य, शिष्टानां रक्षार्थमात्मजीवनम्
नेयं, तत्रैव वर्वर्ति साफल्यं जीवितस्य नः

३८

गुरोः आज्ञां, लोकसेवां, सत्यं, धर्मं जगद्धितम्
एकपत्नीव्रतं चाऽपि पालनीयानि भानुभैः

३९

राज्यं प्रजार्थं, तत राजा प्रजानामेव भूतये
बलं, कोषं, निजं देहं, सुखं चापि समर्पयेत्

४०

'सकृदेव प्रपन्नाय तवाऽस्मीति च याचते
अभयं सर्वभूतेभ्यः, प्रदेयं मद्व्रतं यथा !''

४१



Ramma Dutt

श्रीकृष्णाः

द्वापरोऽस्ति युगं, सन्ति प्रान्तप्रान्तेषु भारते
आर्यराज्यानि, राजानो मिथः सन्ति समत्सराः

सामाजिकः स आदर्शोऽधः पतन्नस्ति सर्वतः
अहंभावोऽस्ति मर्त्येषु बन्धुतामपि विस्मरन्

शक्तिसंचारधीः धीरम् उद्भवन्त्यस्ति राजसु
क्रमशः शिथिला चास्ति लोके वर्णाश्रमस्थितिः

३

यज्ञीया भावना मन्दीभवन्त्यस्ति, ततस्ततः
प्रविशन्तो विलोक्यन्ते ब्राह्मणाः संसृतिस्थितौ

४

'कथं वृत्तिः, कथं मोक्षः सपत्नैः !' इति धारणा
जयन्त्यस्ति मनुष्याणां सृतीम् अध्यात्मधारणाम्

५

अहंमन्या, राज्यलुब्धाः, क्रूराः क्षत्रियबन्धवः
बाधमानाः प्रजाः शान्ता अशान्तिं तन्वते भुवि

६

सर्वान् उन्मूल्य तान्, एकं धर्मराज्यं परं जनाः
अनिशं भावयन्ते स्म शान्तये, स्थितये हृदा

७

अन्यतो वंशदोषस्य कंसस्य दुःशासनात्
मथुरा-राज्यलक्ष्मीः सा रोदिति स्म प्रजाहृदा

८

बन्दीकृतस्तेन भ्रुवः उग्रसेनः प्रजाप्रियः
सदेवकिः ,आस्यनेता वसुदेवश्च निष्ठुरम्

९

मूढैः शठैः पशुबलैः स्वमल्लैः मुष्टिकादिभिः
अभयः स करोति स्म कंसो राज्यविडम्बनाम्

१०

मथुरायाः तथा भूमेरेव तां तां तमःस्थितिम्
जिहीर्षतीव, जगते दित्सतीव नवां सृतिम्-

११

किञ्चित् लोकोत्तरं ज्योतिः कारामू एव प्रकाशयत्
शिशुरूपेण देवक्याः स्वर्णकुक्षेः अजायत

१२

कंसोऽजिघांसत् तं, किन्तु गोकुले स्मयते स्म सः
कथं विद्यात् स षड्यन्त्रं गुप्तं विद्रोहिणो विधेः !

१३

सा वात्सल्यमयी माता यशोदा कृष्णमर्भकम्
प्राप्य, प्राप्तं निजोत्संगे मेने त्रैलोक्यवैभवम्

१४

संसारिणः कति स्वर्गे, संसारे स्वर्गिणः कति
प्रापुः तदा हि कृष्णस्य बालक्रेलया विचित्रया !

१५

दीनां व्रजस्थितिं, यत्र तत्र राज्ञो विभीषिकाम्,
वन्दिनौ पितरौ जानन्, शृण्वन् कृष्णः समैधत

१६

श्रमस्य स्वोपयोगाय, शक्तिसंवर्धनाय च
स प्राक् गोपवयस्यान् स्वान् नवनीतान्यहारयत

१७

ततो गव्यैः पुष्टगात्रान् गोपीगोपान् वनानि
क्रीडयन्, वेणुगीतेन बोधयन् ऐक्यमानयत

१८

लोकोद्धारपरैः तैस्तैः चरित्रैः भूरिविक्रमैः
प्रभावितः समे गोपाः मेनिरे तं स्वनायकम्

१९

इतः संघः, ततोऽभूया ! तद्द्वयोः क्षेत्रसंगमात्
संघर्षोऽभूत् कंसराज्यं स्मृतिशेषमभूत् क्षणात्

२०

उन्मोच्य पितरौ, ताश्च प्रजाः कंसस्य शासनात्
दीर्घलक्ष्यः स विश्वस्य समस्यासु मनो दधे

२१

असंख्यापीडिता देशाः, असंख्या दस्यवो नृपाः
स समं तान् धूलयितुं क्षेत्रमेकं व्यचारयत

२२

देहलीराज्यसंचाऽसीत् तदा कुरुषु, तेषु वै
भेदः, तमेव विश्वस्य क्रान्तिक्षेत्रं स निर्ममे

२३

एकमुत्तेजयन्, अन्यं भेदयन्, कहिं पक्षयन्
सोऽकल्पयत् महाभीमं युद्धं कौरवपाण्डवम्

२४

रणारम्भे बोधयितुम् अर्जुनाय स मुह्यते
ददौ गीतां, ययाऽलब्धं विश्वमेव नवां दृशम् !

२५

पक्षग्राहं दस्युधान् क्षत्रधूर्तान् नियोधयन्
भुवो भारेण सार्धं तान् निःशेषान् अकरोत् हरिः

२६

एकच्छत्रं धर्मराज्यं देहल्याम् समयोचितम्
संस्थाप्य कृष्णः स युगं नवीनं पर्यवर्तयत्

२७

स्वस्यैव व्यपदेशेन साऽहन्तान् यादवान् च सः
अघातयत् मिथः स्थित्यै, भूत्यै संसारबान्धवः

२८

एवं स वीर्यमार्जन्या निरस्यन्दोषसंकरान्
पृथ्वीं दिव्यपरिष्कृत्या शुद्धां रम्यां सकृत् व्यधात

२९

गताः पञ्चसहस्राब्दाः, चरित्रैः किन्त्वसौ महान्
पुरुषोऽद्यापि मर्त्यानां स्मृत्यां, भक्त्यां च जीवति !

३०

विश्वोद्धाराय धर्माय युगविप्लवकारिणः
अचिन्त्यशक्तेः कृष्णस्य सन्देशोऽत्येवमर्हितः—

३१

"धर्म एव हि संसारे मन्यते सर्वतो महान्
तेन प्रवर्तनं सम्यक् कर्तव्यं जायते नृणाम्

३२

धर्मसूत्र्यः सन्ति नैकाः, परं ताः कामधेनुवत्
सुखेविता भवन्त्येव सर्वाः कामदुघाः नृणाम्

३३

तत् नोच्चावचता ग्राह्या धर्मैक्येकप्रलब्धिषु
परं स्वधर्मः श्रद्धेयः, पालनीयश्च शान्तये

३४

कर्मक्षेत्रेऽत्र संसारे सर्वं मानवजीवनम्
कर्मण्येवाऽधारितं, तत् न त्याज्यं कर्म मानवैः

३५

अस्मिन् जीवनसंग्रामे पुरुषोचितया धिया
तया वीरतया स्थित्यः समाधेयाः नवा नवाः

३६

कृतं कर्म फलत्येव शुभं स्यात्, अथवाऽशुभम्
मनुष्यो म्रियते, किन्तु न तत् नश्यति कर्हिचित्

३७

एतत् कर्मरहस्यं, यत्—न धर्मेणेति कर्मणा
पापं भवति, तत्त्वस्ति फलाशायां हि केवलम्

न राज्यत्यागतस्त्यागो, मुक्तिर्वा जायते नृणाम्
इन्द्रियाणां समनसां संयमात् सोऽथ सा भवेत्

३९

स्पृहाहीनम्, अनासक्तं, स्वकर्तव्यधिया कृतम्
यत् कर्म, तत् न बध्नाति पुरुषं समदर्शिनम्

४०

निमित्तंमन्य, ईशस्य कर्तृत्वे विश्वसन् नरः
तदर्पणधिया कुर्वन् तमेव हि निषेवते

४१

जयं, पराजयं चैकं मत्वा लोकस्य गुप्तये
ईशप्रीत्यै लोकधृतैः योद्धव्यं कर्मयोगिभिः

४२

सद्गुप्त्यै, दुष्टसंहृत्यै, धर्मसंस्थापनाय च
धरातलेऽवतरति परआत्मा युगे युगे !"

४३

—[०]—

म. बुद्धः

सार्धं सहस्रद्वितयम् हायनानां गतं यदा
नृसमाजं खण्डयन्ति जात्याद्या विविधा भिदाः

१

सर्वत्र वातावरणमस्ति रूक्षं, मिथःस्मयम्
अस्ति मर्त्यजगत् येन मुहुः स्वात्मनि साम्यम्

२

संविदः संविदाभासः, कर्माभासश्च कर्मणः
तत्वं विलुम्पतो धीरं कारणं लोकशर्मणः

३

संयमं ससदाचारं निगिलन्निव सर्वतः
विद्वत्स्वपि यदा मिथ्याडम्बरो ऽस्ति विजृम्भितः

४

विस्मारयति सत् तत्वं शुष्कस्तर्कोहि वादिनाम्
प्रतारयति कल्याणं रूढिश्रद्धा प्रपञ्चिनाम्

५

नानारूपाः स्वार्थधियः प्रसरद्भोगवासनाः
पिवन्त्यः सन्ति बलवत नृणाम् अध्यात्मधारणाः

६

निरागसां पशूनां तैः क्रन्दितैः, रुधिरेण च
वीभत्स्याः यज्ञवेद्यस्ताः क्रन्दन्ति च वदन्ति च

१७

धनेन, सख्यान्येन याजमान्येन तुष्यतः
ब्राह्मणान् वीक्ष्य नैराश्यात् कर्मवादो ऽस्ति चिन्तितः

१८

उपवासकृशाः केचित् ! केचित् पञ्चाग्नितापिनः !
तपः स्वयं विहसति दृष्ट्वा दृष्ट्वा तपस्विनः

१९

मीमांसन्ते वेदविधीन् एकतो ह्यन्धकर्मठाः
अन्यतो भौतिकान् वादान् कत्थन्ते नास्तिकाः शठाः

२०

किं राज्यं, कः समाजो वा नाऽसीत् मानवता क्वचित्
विश्वात्मा तां याचते स्म नीरवं यत्र कुत्रचित्

२१

विश्वकोलाहले तस्मिन् तस्मिन् सद्धर्मविप्लवे
गौतमः प्लववत् जातः संसाराब्धौ हि निप्लवे —

२२

नेपाले, विमले शाक्यकुले, कपिलवस्तुनः
राज्ञो 'म.या' धर्मरक्ष्याम्, अध आरामशाखिनः

२३

तमुत्पाद्यैव जननी माया तेन कृतार्थिता
विरक्तिं तस्य सहजाम् इवोद्बोधयितुं मृता

बहुभ्यो विद्या अगृह्यन्त काले तेन, परं समाः
प्राक्संस्काराद् इव ज्ञाता मेनिरे न नवोद्गमाः

१५

जिज्ञास्या कापि तस्याऽसीत् विद्या सा, यत्र तत्तृषा
आसीत् बलवती, ज्ञात्वा सर्वा भोगतृषा मृषा

१६

अजिघृक्षत् नृपः पुत्रं नानाभोग्यैः प्रकल्पितैः
अमुमुक्षत् गौतमस्तु दुःखान्तैः क्षणिकैश्च तैः

१७

तत् राज्यं, स प्रियः पुत्रः, स्वर्वामा सा यशोधरा !
गौतमः परिव्रराज लिप्सुर्भूतीरनश्वराः

१८

क्षिप्त्वा प्रसाधितान् केशान्, राजवेषं च गौतमः
वनं प्रविष्टो ददृशे मूर्तो त्याग इवाऽदिमः !

१८

जीवमात्रस्योद्दिधीर्षा सा, त्यागश्च स पूजितः !
मर्त्येतिहासः सकल आसीत् ताभ्यां हि गर्वितः

२०

गौतमो गृध्रशिखर-गुहां यमिपवित्रिताम्
जिज्ञासुः आश्रयत, प्रापच्चाऽलार्कस्य स शिष्यताम्

२१

एवं वनात् वनं भ्रान्तो तापसात् तापसान्तरम्
प्राप्तवान् नैव कुत्राऽपि लक्षितं स स्वमान्तरम्

कालात् सपञ्चशिष्यः स उरुवेलवने स्थितः
षड् वर्षाण्युपवासेन दारुणं तप आस्थितः

२३

निष्फलं तत् तपः प्रोचे तं– 'हेतुः सर्वसंपदः
देहो न साधकैः क्लेश्यः, सैष पन्था न संविदः'!

२४

तत् तं देशं, विधिं चापि त्यक्त्वा सपदि बोधये
निरंजनातटेऽभ्यर्त्यं, क्रमं चाऽन्यं स शिश्रिये

२५

अन्यः संकल्प, इतरा प्रतिज्ञा, ऽन्यच्च साहसम् !
तत्र सत्यं तस्य तपोऽकम्पयत् क्ष्मां, विहायसम् !

२६

पूर्णता मानवधियः, पौरुषस्यान्तिमा गतिः !
एकदा निशि तस्याऽभूत् प्रदेशः सहसा चिति

२७

यत्राऽणुरपि नो शोको, नो मोहो, नापि वेदना
यत्राऽनुभूतौ लभ्यन्ते ह्यमेयाः सुखकल्पनाः

२८

यम् मर्त्यम् उद्धरिष्यन् स प्राव्रजत् विगतैषणः
तदर्थेऽमृतमादाय, तत्संगेऽवातरत् पुनः

२९

तमोमयं, मोहसुतं, मर्त्यं बुद्धरविस्ततः
प्रबोधयितुमारेभे नेपालोदय-शृङ्गतः

Renuka Poudyal

प्राक् समाजोन्नतं भागं बिम्बसारादिकं, ततः
अन्यांश्च क्रमशो व्याप बोधांशुः तत्प्रसारितः

३१

के ब्राह्मणाः, के ऽन्त्यजा वा, के पुमांसोऽथवा स्त्रियः!
सर्वोद्धारोऽस्य सिद्धान्तोऽभवत् सर्वजनप्रियः

३२

ग्रामात् ग्रामं भ्रमन्, धर्मं बोधयंश्च जनाञ्जनम्
निनाय विश्वबन्धुः सोऽशीतिवर्षं स्वजीवनम्

३३

अन्ते च कुशिनारायां, तले सालस्य शाखिनः
निर्वाणमभवत् तस्य गौतमस्य महात्मनः

३४

संसारिणं समुद्दिश्य चकारैवं स देशनाः-
'सर्वेषाम् अपि दुःखानां मूलं भवति वासना

३५

वासनाऽप्यपि बलवत् अज्ञानमुपजीवति
तत् अज्ञानक्षयात् एव मनुष्यः सुखमृच्छति

३६

पारेप्रपञ्चमेवास्ति सुखं, यत्र रुजः शुचः,
रागाः, द्वेषाः, कामनाश्च स्तम्भन्ते, संक्षयन्ति च!

३७

अयं भ्रमविलासो, यत् ससारं मन्यते जगत्
ज्ञाते सदुःखं, क्षणिकम् एव निर्विश्यते जगत

तत तृष्णां जहि, जात्याद्यां कल्पितां तां भिदां त्यज
सदाचारं तथा सत्यमहिंसां च सदा भज

३९

योग्यतायाम् श्रेष्ठताऽऽस्ते, नैवाऽस्ते जातिजन्मनोः
स ब्राह्मणो, यो भवति साधको ज्ञानकर्मणोः

४०

शुध्यत्यात्मा नोपवासैः, न व्रतेन, न भस्मना
स विशुध्यति बोधेन, परार्थेन च कर्मणा !

४१

भोक्तव्यमेव हि फलं मनुष्यैः स्वस्य कर्मणः
शुभेन कर्मणा नाऽन्तो भवत्यशुभकर्मणः

४२

मनुष्यो न स, यः प्राणिमात्रे न करुणायते
बलिप्रथा समुच्छेद्या, या व्यामोहात् प्रवर्तते

४३

अक्रोधेन जय क्रोधं, दुष्कृतं सुकृतेन च
मर्त्यमात्रं भ्रातृदृशा पश्य, स्निह्य, क्षमस्व च

४४

बुद्धं, धर्मं च संघं च शरणं कुरु रे जन !
मुमुक्षोः अत्र शरणम् इतरत् नास्ति किञ्चन'

४५

--=o=--

म. ईशामसीहः

गतं सहस्राद्वितयं वर्षाणां, प्रायशः समे
सन्ति पाश्चात्यभूभागाः शासने रोमवासिनाम

१

तदा हि यूरोसलमे काहनाः क्रूरभावनाः
अत्याचरन्ति, जनताः पीडयन्ति च निष्ठुरम्

२

तदातनः शासकश्च 'हेरोडेसो' ऽतिनिष्ठुरः,
पापो, निरंकुशश्चाऽस्ति धनमानेन गर्वितः

३

मुखे नीतिः, करे दण्डः ! स्वार्थाय, स्वमुदे च सः
सर्वतन्त्रस्वतन्त्रः सन् दलति स्म प्रजा भृशम्

४

आविलोऽस्ति तदा लोको विविधैः अन्धकर्मभिः
एकः परं न सहते, को विद्यात् प्रेम किं भवेत !

५

एवं स्थितौ, युसूफस्य धर्मपत्न्या 'मरीयमात'
प्रवासे, वैतलहमे मसीह उदपद्यत

६

दिव्यप्रोज्ज्वलया कान्त्या, लक्षणैश्च विलक्षणैः
दर्शका भावयन्ति स्म तं बालकमलौकिकम्

७

'हेरोडेसं' तदा कश्चित् एवमाचष्ट—ते सुतिः
भविष्यति हि कस्माच्चित् वीरात् यहुदिबालकात

८

श्रुत्वा तत्, क्रोधसंभ्रान्तः हेरोडेसो यतस्ततः
उपद्विहायनान् बालान् परोलक्षान् अघातयत्

९

युसूफो वैतलहमात् मिस्रं, मिस्राद्पि क्वचित्
प्रवसन् पुत्ररक्षायै न्यर्विंशत् विपदः कति !

१०

परं परेण यत्किञ्चित्करणायैव नोदितः
स बालो नृपतेः दौष्टन्यैः अस्पृष्टः समवर्धत

११

हेरोडेसे मृते पत्नीपुत्राभ्यां सह, निर्भयः
न्यवर्तत स्वस्य देशं युसूफः समयान्तरे

१२

बाल्यात् मसीहे धर्मस्य रुचिरासीत् स्वभावतः
भजते स्म स तत् स्थानं चर्चा यत्रेशधर्मयोः

१३

कश्चित् तमोगुणो देवो मसीहं निर्जने वने
पर्यैक्षत स्खलयितुं तं तत्सिद्धान्तवर्त्मनः

सोऽभीषयत ह्यनशनैः, विश्वराज्यैः अलोभयत्
परं मसीहः स्वपथात् व्यचलन्नैव निःस्पृहः

१५

ततो मसीहो नगरे नगरे, धर्ममन्दिरे
प्रचारयितुमारेभे स्वमतं धर्मतत्त्वदम्

१६

अनेन प्रासरत् तस्य ख्यातिः सर्वत्र निर्मला
श्रद्धालूनां श्रावकानां प्रत्यहं वृन्दमैधत

१७

स प्रेम्णि, भ्रातृभावे च धर्मसत्तामुपादिशत्
तत् तस्मै चुकुपुः रूढेः भक्ताः मन्दिरपूजकाः

१८

स्थितः पक्षे निर्धनानाम्, आढ्यपक्षं स आक्षिपत्
तत् ते च स्वार्थरुग्णास्तम् अदिधक्षन् हृदो रुषा

१९

द्वादशाऽसन् तस्य शिष्याः याकूब, यहुदादिकाः
विष्वक् प्रचारयन्ति स्म ये तन्मतमनुत्तमम्

२०

आसीदेवं गुरोराज्ञा— विघ्नेष्वपि विरोधिषु
क्वचित् न प्रतिकर्तव्यम् अङ्गेन, मनसा, गिरा !

२१

तत मतस्य प्रचाराय ते सहन्ते स्म निर्व्यथम्
विरोधिनां मुहुः हेलाम्, छीवितं, कशयाऽऽहतम्

२२

प्रचारो व्याप सर्वत्र, ख्याता तस्य महात्मता
तत्सर्वप्रियतां सोढुं नाऽलं तस्य विरोधिनः

२३

तत मसीहं निहन्तुं ते काहनाः, रूढिवादिनः
धर्माध्यक्षाश्च तच्छिद्रं मार्गयन्ति स्म नित्यशः

२४

कस्य हृत को विजानीते ! त्रिशङ्कूप्यकलोभतः
तस्य शिष्योऽस्करयुतिः अमिलत हन्त ! शत्रुभिः

२५

सैष पाषाणहृदयो नाना च्छिद्राणि सूचयन्
अबन्धयत शत्रुहस्तः स्वगुरुं विजने स्थितम्

२६

अभियोगश्चैवमासीत तस्मिन— सम्राट्पदे स्पृहाम्,
तदर्थं राज्यविद्रोहि-प्रचारं चाऽकरोदिति

२७

लत्ताभिः, मुष्टिभिः, पाशैः ताडयन्तश्च काहनाः
मसीहं बन्दिनं चक्रुः निर्दोषमपि शासकैः

२८

राज्यात् 'ईद' समारोहेऽपि कश्चित् नरघातकः
बन्दी मुक्तो, महात्मा तु प्राणदण्डाय सज्जितः

२९

विहसन्तो, भर्त्सयन्तः, ताडयन्तश्च वर्त्मनि
घातुका निष्ठुरात्मानः प्रापयन् तं वधस्थले

३०

यथाशक्यं विलम्बेन, तथा कष्टेन भूरिणा
विश्ववन्द्यं महात्मानं तं न्यधत्त धर्मधैरिणः

३१

अन्तकालेऽपि धीरोऽसौ महात्मा व्योमदृक् परम्
प्रार्थयत—'मम हन्तृणां दोषोऽयं क्षम्यताम्' इति

३२

एवं क्रौर्यमये ध्वान्ते संसारे मधुरं स्थिरम्
प्रेमदीपं समुद्दीप्य स महात्मा दिवं गतः

३३

विश्वभूत्यै स धर्मस्य तत्त्वमेवम् उपादिशत्—
"उपासनीयो भगवान् एव मर्त्यैः स्वभूतये

३४

प्रेमैव विद्धि तद्रूपं, प्रेमैव हि तदास्पदम्,
प्रेमैव रोचते तस्मै, प्रेम्णयेव स विराजते

३५

तत् ईश्वरं प्रीणयितुम् इच्छता यर्हि कर्हिचित
मर्त्यमात्रे भ्रातृधिया कर्तव्यं प्रेम निश्छलम्

३६

त्यज प्रतिक्रियाबुद्धिं, कश्चित चेत् वसनं तव
हरेत, तर्हि द्रुतं तस्मै स्वभूषां च समर्पय

३७

नो कदापि व्यभिचर, चेत त्वन्नेत्रे परस्त्रियम
पश्येताम्, तत स्फोटय ते, आत्मनोऽन्याङ्गशुद्धये

३८

स्वस्य मित्रे तु यः कोऽपि करोति प्रेम, तत् सदा
स्वस्य विद्रोहकेऽपि त्वं विधेहि प्रेम हार्दिकम्

३९

दानं कुरु, परं तच्च दक्षिणेन करेण चेत्
प्रदत्तं, नैव जानीयात् निजस्यैव परः करः

४०

कुर्याः त्वं संग्रहं स्वर्गे, कुरु नाऽत्र विनश्वरे
भक्तैः अत्र कृतत्यागः परत्र स्वाम्यभाक् भवेत्

४१

अन्यायिनः, शक्तिमतः पीडनात् त्राहि निर्बलान्
ततो द्राक् त्वं परेशस्य प्रीतिपात्रं भविष्यसि

४२

—卐—

म. मुहम्मदः

एशियायां, दक्षिणस्याः पश्चिमस्याश्च मध्यतः
उपगतं फारसस्य ह्यु परक्तमहोदधि--

१

नदीनदैः फुरातायैः परितः परिवेष्टितः,
उच्चावचाचलमयः वनहारित्यमञ्जुलः--

२

अरबो नाम देशोऽभूत् प्राक् कदाचित् सुसभ्यतः
सुसमृद्धश्च विविधैः कलाशिल्पैः, तथोद्यमैः

३

मूर्तिपूजा-प्रथा नाऽसीत्, नचाऽन्या अन्धरीतयः
समाजेऽन्तर्व्यलसताम् सुखं, शान्तिश्च नित्यशः

४

कालेन तस्य सकला नष्टास्ताः सभ्यता, कलाः
तमाक्रामन् क्रमात् दैन्यम्, अशिक्षा,ऽन्धपरंपराः

५

अरबीया अविद्यान्धा विस्मृतप्राच्यगौरवाः
निमग्ना मूर्तिपूजासु तथाऽन्यास्वन्धरीतिषु

६

नराणां बलिभिः हुब्ल, लाताद्या मूर्तिदेवताः
तेऽर्चित्वा प्रार्थयन्ते स्म हितं स्वस्याऽहितं रिपोः

७

आसन् प्रभ्रश्यतां तेषाम् एता एव विशेषताः-
व्यभिचारो, द्यूतसेवा, मद्यसेवा, मिथः स्मयः

८

विस्मरन्तश्च ते स्वीयाः प्राच्याः शिल्पकला बने
ऊष्ट्रान् अजान् चारयन्तः, भ्रमन्तः कालमक्षिपन्

९

स्वल्पेऽपि कारणे द्वेषं कुर्वन्तस्ते स्ववैरिणः
हासं हासं क्षिपन्ति स्म ज्वलने ज्वलदुल्मुके

१०

तदातनाश्च कवयो हित्वा सामाजिकीं धियम्
लेखैः उन्निद्रयन्ति स्म समाजे युद्धचेतनाम्

११

समाजे न प्रतिष्ठाऽसीत् सतीनाम् अपि योषिताम्
ता अस्मर्यन्त यन्त्राणि सजीवानीव कर्मणाम्

१२

देशेऽतिशोचनीयाऽसीत् अवस्था राजनीतिकी
अशान्तिः, अन्यवस्था च नृत्यतो यत्र कुत्रचित

१३

एतादृशेऽनर्थमये समयेऽरबपत्तने
मक्कायां, हाशिमे वंशे, द्वितीयदशके शुभे-

१४

विक्रमस्य शताब्द्याः हि सप्तम्या, भाग्यशालिनः
अब्दुलाहस्य भार्याया आमनायाः सुगर्भतः–

१५

चराचरस्य जगतो नियन्तुः जगदीशितुः
वहन् अमरसन्देशम् अजायत मुहम्मदः

१६

पितुः दर्शनसौभाग्यं नैव स प्राप्तवान्, यतः
तत्पिता प्रययौ स्वर्गं, यदाऽसौ गर्भसंस्थितः

१७

परम्परानुसारेण तन्माता पुत्रवत्सला
'बद्दू' स्त्रियै हलामायै मासिकं तं शिशुं ददौ

१८

चतुर्वर्षीयसौ 'बद्दू' स्त्रिया पालितपोषितः
प्रत्यानीतः पुनर्मात्रा स्वोत्संगे स्नेहमेदुरे

१९

मदीनां स्वं मातृगृहं प्राप्य प्रत्यागता, पथि
माताऽपि स्वर्गता, त्यक्त्वा तं बालं प्राणवत्सलम्

२०

पित्रा, मात्रा वियुक्तं तं योऽरक्षत्, तित्पतामहः
सोऽप्येनमष्टवर्षीयं त्यक्त्वा दैवात् दिवं गतः

२१

ततः स्नेहमयात् स्वस्य पितृव्यात् अबुतालिबात्
प्राप्तसंरक्षणो बालो वर्धते स्म मुहम्मदः

२२

ऊष्णान्, अजान् चारयित्वा, क्रूदित्वा सखिभिः सह
खेलित्वा च निजं बाल्यं निनाय स मुहम्मदः

२३

मृतद्विभर्तृकाम्, अर्धवयस्काम् खदिजाभिधाम्
स्वासक्तां पर्यणैषीत् स्वां स्वामिनीं तरुणोऽपि सः

२४

काले मृतायां तस्यां च तद्विवाहा नवाऽभवन्
आसन् नवैव तत्पत्न्यः आयशा, सफियादयः

२५

चत्वारिंशद्वर्षदेश्यः स जिब्राइल-वाक्यतः
अन्तःस्फुरद्धर्मतत्वो विश्वोद्धारे मनो दधे

२६

मुहम्मदः प्राक् प्रारेभे मक्काया अन्धपूजकान्,
यात्रिणश्च समाख्यातुं धर्मतत्वं जगद्धितम्

२७

अनेकदेवपूजायाः, आचाराणां च दम्भिनाम्
खण्डनात् रूढिविश्वस्ताः तं व्यरुन्धन् कुरैषिणः

२८

तेषां घनोऽन्धविश्वासः क्रमात् क्रोधात्मतां गतः
तं व्यापाद्यैव सत्तां स्वां चकमे परिरक्षितुम्

२९

स्वं हन्तुं, रजनौ स्वस्य गृहम् एवाऽभियास्यताम्
कुरैषिणां मतं बुध्वा प्रतस्थे मदिनाम् असौ

३०

तत्रापि स्वात्मरक्षायै सशस्त्रो रूढिवादिभिः
कुरैषिभिः, यहुदिभिश्चाऽजस्रं स न्ययुध्यत

३१

सदा स आत्मसन्देहः ! तत् निराशामयं तमः !
प्राचारयत तथाप्येको ऽरण्यक्रन्दितवत मतम्

३२

श्रमिणस्तस्य तपसा, त्यागेन, साहसेन च
इतस्ततस्त्या 'इस्लामं धर्मं बुबुधिरे क्रमात

३३

क्रमात् विरोधिनो नष्टाः, प्रवृद्धा अनुयायिनः
अरबीयाः समे दध्युः 'इस्लामं' एकसूत्रिताः

३४

तदा तस्य नवान दिव्योपदेशान् अरबप्रजाः
अस्थिन, चर्मणि, वस्त्रे चोल्लिखन्ति च पठन्ति च

३५

धर्मग्रन्थो मुस्लिमानां, सन्देशो विश्वमङ्गलः
यत् कुरानम्, तदस्यैव ह्युपदेशसमुच्चयः

३६

स्वजीवनेऽरवान एकधर्मसूत्रे निबध्य सः
एकराष्ट्रे च संगठ्याऽपूरयत लक्ष्यमात्मनः

३७

इस्लामात्म नवं ज्योतिः एवं विष्वक् प्रसारयन
त्रिषष्टिवर्षदेशीयः स महात्मा दिवं गतः

३८

तथा गतेऽपि तन्मूर्तिं तां 'इस्लाम' यशोमयीम्
अद्याऽपि साक्षात्कुरुते विश्व-मुस्लिमसन्ततिः

३९

दीर्घलक्ष्यः, सत्यदृढः, सरलः, परमेशितुः
भक्तः, शांतिप्रियश्चाऽसीत् महात्मा स मुहम्मदः

४०

मक्कां त्यक्त्वा यदा सोऽयं प्रतस्थे मदिनां प्रति
'हिज्रि' संवत्सरारम्भः तत एवाऽत्र कथ्यते

४१

स लोकान् एवमाचष्ट- 'मर्त्यान् उद्धर्तुमीश्वरः
काले काले प्रेषयति स्वदूतं पृथिवीतले

४२

सोऽहं तस्यैव दूतोऽस्मि, युष्मान् उद्धर्तुं मागतः
ममोपदेशं शृणुत, तद्धृत्वाऽचरताऽचिरम्

४३

ईश्वरोऽस्ति प्रकाशात्मा, आस्तिके नास्तिके च सः
वर्तते समभावेन, क्षमते, करुणायते

४४

कस्मैचित् इष्टलक्ष्याय, कौशलेन महीयसा
जगत् विनाऽप्युपादानं कारणं सृजतीश्वरः

४५

ईश्वरोऽस्ति न 'काबायाम्', न मूर्तौ, नच दिङ्मने
ईश्वरोऽस्ति भ्रातृभावे, दयायां, स्वात्मनोऽर्पणे

४६

मनुष्याणां कर्मसाक्ष्यं करोति परमेश्वरः
स्वर्गे वा नरके याति जीवः स्वस्यैव कर्मणा

४७

इह जीवःस्वकार्यस्य फलभोगं न विन्दति
परत्र फलभोगाय परतन्त्रः स जायते

४८

+धर्मस्कन्धान् सोम, सलात, जकात, हज्जान् स्वशक्तितः
प्रतिपालय तेरेव मानवात्मा विशुध्यति

४९

दरिद्रान् भर, रोगार्तान् शुश्रूषस्व, भिदां त्यज.
समं वर्तस्व सर्वेषु, तत ईशः प्रसीदति

५०

गृहलक्ष्मीः मातृजातिः अवहेल्या न कर्हिचित
तत्स्वातन्त्र्यं च न च्छेद्यं परेशं प्रीणयिष्यता !

५१

+सोमः-'रमजमा' मासे (यदा कुरानम् अलिख्यत) उपवासः।
सलात- प्रार्थना (नमाजपाठः)
हज्जः- नियतसमये काबा (अरबस्य मन्दिरम्) यात्रा।
जकात- दानप्रदानम्

कुमारी फ्लोरेन्स नाइटिङ्गेलः

[illegible] शताब्द्याः समयोऽस्ति सः
विक्टोरियामहाराज्ञ्याः यदा चलति शासनम्

१

प्रगच्छत्यांग्लसाम्राज्यम् धीरं विस्तृतिवर्त्मनि
तस्य वेलायतस्यापि दशा सुध्रियते क्रमात्

२

विज्ञान, साहित्यकलाः गच्छन्ति प्रगतिस्थितौ
वर्धते एव वाणिज्यम् उद्योगश्चापि वेगतः

३

किन्त्वत्यन्तं महर्घत्वात् आपणे सर्ववस्तुनः
प्रजावर्गस्य दीनस्य हाहाकारोऽस्ति सर्वतः

४

श्रमिकाणां अवस्था च पतति प्रागपेक्षया
म्रियते जनता रुग्भिः, नास्ति खाद्यव्यवस्थितिः

५

कात्रियः, के पुमांसो वा समाजप्रगतिस्तदा
अस्ति वैयक्तिके लाभे, स्वार्थे, भोगविलासयोः

६

एवं स्थितौ देशभूतिम्, कंचिदन्यार्थजीवनम्
आत्मानम् इतिहासः स याचते स्म निरन्तरम्

७

तदा समाप्ताध्ययना, कन्यका स्वच्छभावना
फ्लोरेन्स नाइटिंगेलोऽस्ति सप्तदशहायना

८

वेलायतस्य स ग्रामः हेम्पसायर एतया
सगर्वोऽस्ति, समाजोऽस्ति तदुत्साहात् सकौतुकः

९

सयौवनाऽपि सा भोगे निरपेक्षा, सचेष्टिता
सेवासक्ता समाजस्य दशायां दूयते सदा

१०

विशेषात् रोगिसेवायाम् बद्धतृष्णा, बुभुत्सया
औषधालयकर्माणि पश्यन्ती, भ्रमति स्म सा

११

परं तद्दिच्छां पितरौ विहतः स्म, यतः—तदा
समाजात् न समर्थ्यन्ते स्म स्त्रियः कर्मणीदृशे

१२

पितुः पत्नोः, समाजस्य चापि ताम् अन्धधारणाम्
तस्या विशालः संकल्पः जिगाय समयान्तरे

१३

औषधालय एकस्मिन् अभवत् साऽधिकारिणी
तदैव टर्किं-रुसयोः चाऽपि युद्धमभूत् मिथः

१४

क्रिमियाऽऽसीत् युद्धभूमिः, टर्किसाहाय्यकाम्यया
सायुधाः प्रापुरंग्रेजाः, फ्रेञ्चाश्च क्रिमियाभुवि

१५

औषधालय एकोऽस्ति स्कुटार्याम्, यत्र नौषधम्
अस्ति, शुश्रूषके चास्ति न सेवाधीः न योग्यता !

१६

हिमर्तुरस्ति, तत शैत्यम् ! दुष्प्रबन्धश्च सोऽन्यतः !
विपद्यन्ते, म्रियन्ते चाऽसंख्यायत्राऽऽहता भटाः

१७

तं सेवावसरं सेवामानसः क उपेक्षते ?
स्कुटार्यां नाइटिंगेलः सस्वयंसेविकाऽगमत

१८

अस्याः प्रबन्धात् अभवत स्कुटार्यां औषधालयः
अचिरात सुन्दरः, स्वच्छः, सरुजां रञ्जनालयः

१९

तत्र वैतनिका वैद्याः, सेवकाश्च यथातथा
वृत्त्यै चलन्ति, समयं क्षिप्त्वा रात्रिं स्वपन्ति वै च

२०

सा तु सेवाधिया रात्रौ अपि सावहिता भृशम्
बाभ्रम्यते रोगिशय्याः पश्यन्ती दीपरश्मिभा

२१

न सहन्ते स्म तां तत्र पुराणाः कर्मचारिणः
तेष्वनास्था साच कृत्यात् स्वस्या न व्यचलत् क्वचित् !

२२

कोष्ठे प्रविष्टमात्रां तां रोगिणो देवतामिव
पश्यन्ति तस्या दयया, सेवया च प्रभाविताः

२३

तस्यां प्रविष्टमात्रायां रोगिणः स्वां व्यथामपि.
विस्मरन्ति स्म, धन्यैव तस्याः सेवाकला परा !

२४

स उत्साहः, स आदर्शः ! ता वेलायतयोषितः
तस्यां कथां यथा सूतां अशृण्वन् विस्मितात्मना

२५

क्रिमियातो निवृत्तां तां विश्वगीतगुणोदयाम्
वेलायतप्रजा भव्यैः स्वागतैः समवर्धयन्

२६

व्ययितानि स्वागतार्थे संचितानि धनानि च
औषधालय-तच्छिक्षार्थे च त्यागात्मना तया

२७

स्वार्थत्यागमिमं, सेवां च तां ताम् अनुकीर्तयन्
हृष्टो ब्रिटिशसम्राट् तां पदकैः समभूषयत

२८

निन्ये कालप्रवाहस्ताम्, किन्तु स्थास्यति निर्जरः
तस्याः सेवात्यागमय इतिहासो युगान्यपि !

२९

किञ्च स्वर्णं तदैतिह्यम् भाविनीः विश्व-कन्यकाः
विश्वक्षेमाय तत्सेवात्यागौ संस्मारयिष्यति

३०

म. श्रीलेनिनः

कालो युगपरिच्छेदः, राज्यवादस्य लाञ्छनम्
प्रवर्तते जारराज्यं क्रूरलिष्टुरशासनम्

१

दासप्रथाऽस्ति सर्वत्र घोरा मानवतारिपुः
व्यापार्यन्ते च यन्त्राणि स्वल्पस्वल्पानि कर्मसु

२

क्रीयन्ते हि जना यत्र, विक्रीयन्ते च मेषवत्
तस्यां स्थितौ कथं वा स्यात् विकास उद्यमादिषु

३

जारराज्यं रुग्णमस्ति क्रीमियाजौ पराजयात्
संत्रस्तमस्ति कृषकैः विद्रोहाच्च क्वचित् क्वचित्

४

तत् यद्यपि क्षयन्त्यस्ति नृशंसा दासपद्धतिः
तथापि कृषकेष्वस्ति नैर्भूं स्यात् दासवत् स्थितिः

५

+भूमीपतीनां क्षेत्राणि कर्षन्ति कृषकाः, परम्
करेण, दण्डेन भृशं ते शोष्यन्ते बुभुक्षया!

६

+भूमीपतिः=जमीनदारः

घोरा शरीरदण्डस्य प्रथाऽस्ति, नग्ननिर्बलाः
कृषका लघुदोषेऽपि ताड्यन्तेऽङ्गेषु वेतसैः

७

अत्याचारैः भूपतीनां विह्वलाः कृषकाः स्वकम्
देशं त्यक्त्वा प्रयान्ति स्म विदेशे वृत्तिकाम्यया

८

कृषकाः, श्रमिका वा ये स्युः, तेषां स्वार्थगुप्तये
अधिकारो राजनीतौ नैवाऽसीत् जारशासने

९

रुसे रुसीतराणां च जातीनां सकलस्थितौ
न कश्चित् अधिकारोऽस्ति, तेन शोच्याऽस्ति तद्दशा!

१०

रुसीतरासु भाषासु शिक्षा, पत्रप्रकाशनम्
इत्यादि सर्वमेवाऽस्ति निषिद्धं सांप्रदायिकैः

११

यत्रतत्र प्ररूढानि श्रमिकान्दोलनानि च
निष्ठुरं दमयन्ति स्म निर्दया जारशासकाः

१२

एवं क्रूरे शासनेऽपि देशस्य कोणकोणतः
उत्पद्यन्ते स्म निभृतं संघाश्च मार्क्सवादिनः

१३

छिद्रयन्तो जारराज्यं, दिशन्तो जनजागराम्
एंगेल्समार्क्सयोः लेखाः प्रचार्यन्ते च गुप्तितः

१४

तथात्वेऽपि स्वदेशीयान् धनिकान् शुभमाशितम्
नृजागर्तिविभीतैः तै अन्तराष्ट्रैश्च वर्धितम्—

१५

जारराज्यं साभिमानात् स्वस्य न्यायात् निरंकुशात्
चलति स्म न, शस्त्राणि प्रदर्श्य, विहस्तन् प्रजाः !

१६

प्रदग्धात्मा शक्तिहीना, विवक्षुः स्तोक-जागरा
सहते स्म प्रजाऽगत्या हृत्कीलं जारशासनम्

१७

तप्ता रुसमहाभूमिः स्वप्रजार्थे तृषार्दिता
प्रतीक्षते स्म रक्तस्य प्रपातं क्रान्ति-दुर्दिने

१८

एवं हि वातावरणे जनविक्षोभकारणे
जातो रुसस्य सिंविर्स्के उलियानाफ् स लेनिनः

१९

विद्यालयाध्यापकस्य स्वतातस्य प्रशिक्षणात्
स आसीत् बाल्यतो धीरं द्रष्टा, सूक्ष्मं विचारकः

२०

उत्तीर्णवाक्कीलतोऽसौ सदसद्ज्ञानभासुरः
अशोचत् चिन्तयन् देशं तथा दीनं, तथाहतम्

२१

शिराशिरासु देहस्य मार्क्सवादेन पूरितः
सोऽयं संलग्नवान् गाढं श्रमिकान्दोलने ततः

२२

फेदोरयेफदले पूर्वं मार्क्सवादिनि सोऽविशत
ततः स्वयं समारायां नवं संगठनं व्यधात्

२३

कालेन सेन्टपीटर्सवर्गं प्राप्य स्वपाटवात्
एकीकृत्य च तत्रत्याः समितीः मार्क्सवादिनीः-

२४

तत्रेतृत्वं निर्वहन् स श्रमिकान्दोलनं महत्
प्राचालयत्, यत् व्यरुणत् जारसत्तां हि निष्ठुराम्

२५

'थार्टन्' यन्त्रालयस्थानां श्रमिकानां कृते चलन्
बन्दीकृतः स कारायां निर्दयं जारशासकैः

२६

कति वारान् एष एवं कारायां, कर्हिचित् स्थितः
विदेशे, कालपानीये च लेभे दुःखयातनाः

२७

परं स निर्जरोत्साहः कर्मयोगी बहिःस्थितो
कार्यतः, वन्दितायां च लेखैः लक्ष्यमुपागमत्

२८

कर्मठोऽसौ प्रवासाच्च 'इस्क्रायाः' ज्वलदुल्मुकैः
+धनवादं, जार-राज्यं चादन्दह्यत निर्ममम्

२९

पित्रोग्राडे रास्पुटिने हते न्यायालयाधिपे,
अन्नाभावात् प्रजावर्गे विद्रोहाय सचेष्टिते-

३०

+धनवादः=पूँजीवादः

उदारे नेतृवर्गे च बन्दीभूते, प्रकंपितः
स्वात्याचारात् स्वयं त्रस्तः जारो राज्यासनं जहौ

३१

प्रास्थाप्यताऽस्थायि राज्यं प्रजातन्त्रस्य नाम्नि
यत्र बाह्यसुधारार्थी करेन्स्कि: प्रमुखः स्थितः

३२

लेनिनस्यैव सन्देशात सत्यं हृत्सु प्रबोधिता:
ददृशुः जनता धूर्तं करेन्स्किं छद्मवेषिणम्

३३

तदा पीटर्सबर्गस्थः लेनिनः ट्रात्स्किना सह
क्रान्तेः संगठनं चक्रे; निष्फलं यदभूत तदा

३४

यतः ट्रात्स्कि: मध्यवर्गं नेतृत्वायान्वमन्यत,
लेनिनः श्रमिणां वर्गं, तत् वैमत्यं तयोरभूत

३५

अन्ते लेनिननेतृत्वात् प्रबुद्धं, प्रबलं च तत्
साम्यवादि दलं राज्यं करेन्स्केः निरमूलयत्

३६

ततो नवीनया रीत्या, जगदेव प्रलोभयत्
रुसे, साम्ये जिगमिषु प्राचलत् श्रमिशासनम्

३७

ततो रुसमहाकाशे काला दैन्यघटा गता
प्रोज्ज्वला श्रीः समुदिता लेनिनेन महात्मना !

३८

संसारस्य व्यवस्थित्यै, भूत्यै च मार्क्सवादिनाम्
सर्ववाद-प्रतिरूपधीं दृष्टिकोणो भवत्ययम्-

३९

"धनवादः प्रतनुते एकत्र धनसंचयम्,
बहुत्र दैन्य, मर्थित्वं, दारिद्र्यं, वृत्तिहीनताम्

४०

+आश्रयत्यर्थवादः प्राक् लघूत्पत्तिकरान्, ततः
तान् बहूत्पादका भूयः आत्मसात् कुर्वते क्रमात्

४१

वर्तमाने समाजे ते महान्तो धनिनः समे
भवन्ति राज्यसंस्थायाः अन्योन्याश्रयिणः सदा

४२

यतो राज्यस्य साहाय्यात् ते देशेष्वितरेष्वपि
कल्पन्ते स्वस्य वाणिज्यं प्रसारयितुमश्रमम्

४३

महतां वणिजां स्वार्थं गोप्तुं साम्राज्यवादिनः
देशा मिथो नियुध्यन्ते व्याप्तुं देशान्तरापणम्

४४

धन-सत्ताधारकाणां अध्यादेशेन माद्यताम्
शासकानां शोषणाय राज्यं भवति साधनम्

४५

संसद्राज्यप्रणाली तु वर्गस्य धनवादिनाम्
मतं शोषणषड्यन्त्रं परोक्षमधिनायकम्

४६

×अर्थवादः=पूंजीवादः

संसारेऽर्थात् नान्यदस्ति सुख्यं, मानवजीवने
सर्वप्रकारोऽभ्युदयो धनमेवोपजीवति

४७

मर्त्येतिहासः सकलः सूक्ष्मदृष्ट्या समीक्षिते
वर्गसंघर्षेतिहासः स्पष्टत्वेनाऽवगम्यते

४८

कश्चित् स्वर्णस्य पल्यङ्के, कश्चित् धूलिषु वर्त्मनः !
भूमौ न शांतिः, न सुखं विनात्वर्थसमानताम्

४९

निःश्रमाः सन्ति सधनाः, श्रमिकाः सन्ति निर्धनाः
भवितव्यं श्रमफलं श्रमिणामेव गुप्तये

५०

क्रमात् उत्पत्तिमूलेषु सर्वोद्योगेषु, भूमिषु
राष्ट्रीयीकरणं कार्यं राज्येनैव यथाऽचिरम्

५१

'व्यर्की राज्याये' ति दृष्ट्या राज्यमेव हि योजयेत्
यावदावश्यकैः लाभैः, उचितैश्च श्रमैः प्रजाः

५२

×सर्वहार-दलात् एव श्रमिकैः, कृषकैः बलात्
सा व्यवस्था प्रबध्येत साऽधिनायक-शासनात्

५३

वा देऽत्र सर्वहाराणां एकस्वाम्यं हि साधनम्,
लक्ष्यं च वर्गहीनस्य समाजस्य प्रवर्तनम्

५४

×लोकप्रचलनात्-'सर्वेषां जीवनसाधनानां हारः अपहरणं यस्येति' एतस्य साधुत्वं समर्थितम्, सर्वबोधाय शब्दकोशसमृद्धये च ।

म. गान्धिः

मिथो भेदधिया प्राप्तात्, पारतन्त्र्यात् विदेशिनः
तत् भारतं दीनतायाम् गच्छदस्ति दिनात् दिनम्

१

यत विद्यायाः, चरित्रस्य, कलायाः, कौशलस्य च
आदर्शदं सर्वभूमेः आसीत्, सर्वसमृद्धिमत्

२

तदेव भारतं हन्त ! प्रतिक्षेत्रं, प्रतिस्थिति
सदा परमुखापेक्षि दीनं, हीनं च वर्तते

३

पृथिव्यां बहवो देशाः, पाश्चात्या वा विशेषतः
उन्नतेः शिखरे प्राप्ताः, यदाऽसीत् तस्य सा दशा !

४

गृहशिल्पं गतं, ग्रामे गतं तत पञ्चशासनम्,
गतं गुरुकुल-स्थानं, गतम् अध्यात्मदर्शनम् !

५

परा सत्ता, परा शिक्षा, परा नीतिः, परैव दृक् !
सर्वा नष्टा भारतस्य स्वसत्ताः, स्वविशेषताः

६

बहिः प्रयाति वस्तु स्वं, यन्त्रैः, शुल्कैः महर्घितम्
तदेव क्रीणते भूयः निःश्रमाः श्रमिका इह

७

इतः शुल्कं, ततः शुल्कं ! सर्वत्रैवाऽस्ति शोषणम्
पारेसिन्धु, विदेशे श्रीः भारतस्य प्रसर्पति

८

भिक्षाः, उञ्छाः, किंकरताः, अकालमृतयो, रुजः
क्रीडन्त्यत्र, विभज्यैतान् भुञ्जन्त्यगतिकाः प्रजाः

९

एतेषाम् एव रक्तेन, स्वेदेन च विदेहिनः
स्वामीभूता इमान् एव दलन्ति स्म ह्युपालहा

१०

अशिक्षातः, कुशिक्षातः समाजे याऽस्त्यनेकता
संकीर्णा जातयो, धर्माः तां पुष्णन्ति निरन्तरम्

११

प्रायः समाजे लीनाऽस्ति विशुद्धा बन्धुभावना
स्वल्पस्वार्थस्याऽपि कृते नह्येकः सहते परम्

१२

यज्ञप्रथाऽस्ति विच्छिन्ना, परं मन्दिरमन्दिरे
निःसंकोचं छागबलिः दीयते धर्मनामनि

१३

अज्ञो वेत्येव नो धर्मं, प्राज्ञश्च परसंस्कृतेः
दास्यात् तं मन्यतेऽनर्थम्, एवं धर्मोऽस्त्यनाश्रयः

१४

राष्ट्रिया चेतना स्वल्पस्वल्पेष्वेवाऽस्ति, मानवाः
इतरे च परोलक्षाः सन्ति भाग्येषु निर्भराः

१५

परःकोटिषु ये केचित् स्युः स्वराज्यस्य याचकाः,
मार्यन्ते पशुमारं ते सत्तारूढैः निरंकुशैः

विशाला साऽऽङ्गलसत्ताऽस्त्रैः, कूटनीत्या च दुर्मदा
अशस्त्रैः कशमुत्क्षेप्या ! समस्यैषाऽस्ति भीषणा !

१७

ईदृशेऽशान्तिकठिने, व्यापके देशसंकटे
ऊनविंशतिसंख्यायाः शताब्द्या उपमध्यतः (१८६९)

१८

अस्य भारतवर्षस्योत्तरतः पोरबन्दरे
जातो, मोहनदासः स, यो गान्धिरिति विश्रुतः

१९

सद्व्रतायाः, धर्मभीरोः मातुः स्तन्यात् स बाल्यतः
धर्मबुद्धिः कोमलात्मा सुशीलः, सत्यवाक् अभूत्

२०

शिक्षावस्थो राजकोटात् उत्तीर्याऽङ्गलप्रवेशिकाम्
वाक्कीलत्वस्य शिक्षायै स बेलायतमव्रजत्

२१

तामुत्तीर्य प्राप्तदृष्टिः न्यायान्याये, हिताहिते
दीर्घलक्ष्यो महोत्साहः स स्वदेशं निवृत्तवान्

२२

वाक्कीलत्वं तस्य सदा न्यायपक्षं समर्थयत्
आशाम् आङ्कुरयत् तन्वीं भारते न्यायवञ्चिते

२३

शस्त्रसज्जैः, कूटचालैः, सभ्यंमन्यैश्च शासकैः
योद्धुं स निर्ममे नूत्नं शस्त्रं सत्याग्रहाभिधम्

२४

सोऽफ्रिकायां दक्षिणस्यां जातिभेदनयात भृशम्
सीदतां भारतीयानां कृते सत्याग्रहं व्यधात्

२५

अत्रैव प्राक् अहिंसस्य स्वस्य सत्याग्रहस्य सः
प्रयोगं, तद्विकासं, तत्सिद्धान्तं च प्रदत्तवान्

२६

एष एव श्रीगणेशो मङ्गलस्तस्य भाविनः
सर्वोदयस्य वादस्य, चरित्रस्य च भूरिणः

२७

नेटाले जुलुविद्रोहे, बोअराजौ च तत्कृतम्
नेतृत्वं, आहतानां च सेवाऽभूतां प्रशंसिते

२८

पक्षाबस्याऽत्याचरिते, कर्हि शुल्के च लावणे
'भारतं त्यजते' त्यस्मिन् प्रस्तावे च स कर्हिचित्-

२९

देशोद्धाराय, धर्माय, स्वराज्यार्थी स तापसः
कति वारान् अगात् कारां अभुनक् कति यातनाः ! !

३०

निःस्पृहः कर्मयोगी स 'स्मरन् कृत्यं' कदापि न
व्यचलत् स्वस्य संकल्पात्, सत्यात्, धैर्यात् ससाहसात्

३१

संघर्षार्हां स्वराज्यस्य कृत्वा स स्वां महासभाम्
अन्ते त्यक्त्वा च तां ग्रामसुधारादौ प्रलग्नवान्

३२

कर्हि कचित् कचित् कर्हि प्रकल्प्य लघुमाश्रमम्
निन्ये कालं स सेवाभिः, उपदेशैश्च धार्मिकैः

३३

प्रायोक्ष्यत न देशार्थे स चेत स्वाऽनशनायुधम्
अजीविष्यत भारतं किम् सांप्रदायिकविग्रहे ?

३४

अस्यैव त्यागतपसा, साहसेन च भास्वता
उत्क्षिप्तम् भारते खातम् आंग्लराज्यस्य केतनम् !

३५

प्रजातन्त्रीय-पद्धत्या प्रोत्तिष्ठत उत्तरोत्तरम्
तेनैव भारतं जातम् स्वराट्, महिमभिर्विराट्

३३

विश्वभावनया, देशजने चाऽपत्यवद्धिया
संसारस्य महात्माऽभूत स 'बापू' भारतस्य च

३७

अन्ते मानवमात्रस्य बन्धुःस प्रार्थनास्थले
निहतो हन्त! कस्माच्चित विक्षिप्तात् अन्धधर्मणः

३८

किन्त्वचिन्त्य स्तत्प्रभावः यत-दिवं व्रजितोऽपि सः
संनिरुन्धन् अस्ति देशे सांप्रदायिकविग्रहम् !

३९

महात्मनः तस्य मृत्यौ भारतं वाष्पधारया
अशोचत, पररा्ष्ट्राणि स्वध्वजावनमेन च

तत्सिद्धान्तो 'गान्धिवाद' नाम्ना विश्रूयतेऽभितः
अध्यात्म-राजनीत्यो र्हि भवेत् यत्र समन्वयः

४१

संघर्षारेः, शान्तिबन्धोः गान्धिवादस्य सर्वदा
अहिंसा साधनम्, लक्ष्यं सर्वाभ्युदय-सुस्थितिः

४२

अर्थनीतौ कामयते स वैयक्तिकमुद्यमम्
मिथ आर्थिक-वर्गाणां सहयोगं च पूरकम्

४३

भूमीपतेः, अर्थपतेः, राज्यस्य, नृपतेश्च वा
न जिहीर्षति सत्तां स, सा चेत् संरक्षिका नृणाम्

४४

सर्वस्य देशमात्रस्य स्वातन्त्र्यं सोऽनुमन्यते,
सहैवान्ताराष्ट्रियत्वं चापि तत्तस्य गुप्तये

४५

सामाजिकीः, राजनीतीः, आर्थिकीश्च परिच्छिदीः
सामंजस्येन, योगेन स समीकर्तुमिच्छति

४६

गान्धिवादो मिथःस्नेहात्, सेवाभावात् च सश्रमात्
एतत् ध्वान्तं जगद्रूपं परिमार्जितुमिच्छति

४७

यत्र तत्र स सद्भावं, तपः, त्यागं प्रबोधयन्
जगद्भूत्यै पुनः शुद्धं हिन्दुत्वं स्रष्टुमिच्छति

४८



लेखकस्य अन्या रचनाः-

सत्यहरिश्चन्द्रम् (महाकाव्यम्) – संस्कृते
एक्काईस कथा (कथासंग्रहः) – नेपाल्याम्
म लोग्ने हुँ (") – "
झिल्का (भावनात्मक ") – "
अगुल्टो (कक्तिासंग्रहः) – "
नागरिकशास्त्रम् (मुद्रणालये गतमस्ति) – संस्कृते